# shrImadrAmAyaNasArashrIrAmastotram

# શ્રીમદ્રામાયણસારશ્રીરામસ્તોત્રમ્

## Document Information

Text title : rAmAyaNasArashrIrAmastotram

File name : rAmAyaNasArashrIrAmastotram.itx

Category : raama, puShpAshrIvatsan

Location : doc_raama

Author : Pushpa Srivatsan

Transliterated by : N V Vathsan nvvathsan at gmail.com

Proofread by : N V Vathsan nvvathsan at gmail.com

Source : SriTyagaramaPushpavali 2005/2017

Acknowledge-Permission: Copyright Pushpa Srivatsan

Latest update : November 25, 2017

Send corrections to : Sanskrit@cheerful.com

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

Please note that proofreading is done using Devanagari version and other language/scripts are converted using **sanscript**.

April 30, 2023

*sanskritdocuments.org*

# શ્રીમદ્રામાયણસારશ્રીરામસ્તોત્રમ્

ૐ

શ્રીરામજયમ્

ૐ સદ્ગુરુશ્રીત્યાગરાજસ્વામિને નમો નમઃ ।

નમઃ શ્રીત્યાગરાજાય મદાચાર્યવરાય ચ ।
શ્રીસીતારામભક્તાય ગુરુદેવાય તે નમઃ ॥

ૐ સીતાવરાય વિદ્મહે । ત્યાગગેયાય ધીમહિ ।
તન્નો રામઃ પ્રચોદયાત્ ॥

અથ શ્રીમદ્રામાયણસારશ્રીરામસ્તોત્રમ્ ।

શ્રીરામપ્રેમરૂપાય રામાયણસુગીતયે ।
ત્યાગબ્રહ્મગુરુસ્વામિસત્પાદાય નમો નમઃ ॥ ૧॥

શ્રીત્યાગબ્રહ્મગેયાય શ્રીસીતારામમૂર્તયે ।
શ્રીમાનસાબ્ધિસોમાય શ્રીરાઘવાય તે નમઃ ॥ ૨॥

નિર્ગુણબ્રહ્મરૂપાય નરોત્તમાવતારિણે ।
ગુણાસ્પદાય ગુણ્યાય રઘુશ્રેષ્ઠાય તે નમઃ ॥ ૩॥

સીતાં શ્રીરામપત્નીં ચ શ્રીલક્ષ્મીં જનકાત્મજામ્ ।
ગઙ્ગીભૂતસુપાવિત્ર્યાં શ્રીમાતરં નમામ્યહમ્ ॥ ૪॥

કારુણ્યવીક્ષિતાં સત્ત્વાં માધુર્યતમભાષિણીમ્ ।
સઙ્ગીતસુસ્વરાં સીતાં શ્રીમાતરં નમામ્યહમ્ ॥ ૫॥

તપ્તજામ્બૂનદાભાં તાં તપનોભૂતતાપસીમ્ ।
તાપત્રયાગ્નિશામ્યાં સાં શ્રીમાતરં નમામ્યહમ્ ॥ ૬॥

તેજોજિતક્ષપાનાથાં ક્ષિતિજાં ક્ષાન્તિવિગ્રહામ્ ।
ત્યાગરાજનુતાં શ્રેષ્ઠાં વન્દે રામસતીં વરામ્ ॥ ૭॥

સર્વમઙ્ગલસમ્પન્નાં સર્વભવ્યગુણાશ્રયામ્ ।
સર્વમઙ્ગલધાત્રીં ચ શ્રીમાતરં નમામ્યહમ્ ॥ ૮॥

રામો બ્રહ્મસ્વયંજાતો ભાવનાવો ભવાપહઃ ।
નામતારકસત્સારો રામો રક્ષતુ માં સદા ॥ ૯॥

શ્રીમન્નારાયણોવિષ્ણુર્ભૂતલાવતરાવ્યયઃ ।
રામાયણમહાકાવ્યનાથશ્રીરામચન્દ્રસઃ ॥ ૧૦॥

અખિલાધારમૂલશ્ચ અવાઙ્માનસગોચરઃ ।
અખિલાણ્ડૈકનાથશ્ચ અખિલાશરદાશુગઃ ॥ ૧૧॥

દુરાપ આપ્તસૌલભ્યો દુરિતેભહરિર્હરિઃ ।
દૂરીકૃતાઘસઙ્ઘાતો દૂરપારકૃપોદધિઃ ॥ ૧૨॥

માનવાવતરાવ્યક્તઃ પક્ષિવાનરસેવિતઃ ।
ચિરકાલધરાપાલો વિદુસાધુસુવન્દિતઃ ॥ ૧૩॥

જન્મમૃત્યુજરાવર્જો જગદારામરામકઃ ।
જગદુદ્ધારણાતુલ્યો જયરામો જયાવહઃ ॥ ૧૪॥

દેવતાસાર્વભૌમશ્ચ દેવાદિમાર્ગિતાચ્યુતઃ ।
દેવાધિદેવભૂજાપો દીનમાનવરક્ષકઃ ॥ ૧૫॥

લીલાવતારપૂજ્યશ્ચ લીલાચતુરમોહનઃ ।
લોકધારી ત્રિલોકાપ્તસ્ત્રિલોકસન્નુતોત્તમઃ ॥ ૧૬॥

મોહદારી સુહૃન્મોહો મોહકારી ચ મોક્ષકઃ ।
મોહનાકારરામશ્ચ મૌનિરાજસુપૂજિતઃ ॥ ૧૭॥

ગુણસાન્દ્રો ગુણાતીતો ગરદાશનવાહનઃ ।
ગતકામસુહૃત્કામો ગતમોહાતિમોહિતઃ ॥ ૧૮॥

દશાવતારલીલશ્ચ દશાનનારિરામસઃ ।
દાશરથ્યતિસૌલભ્યો દાસમાનસસંરમઃ ॥ ૧૯॥

પરિપૂર્ણાવતારશ્ચ પરિપૂર્ણમનોરથઃ ।
પરિપાલિતસદ્ભક્તઃ પાર્વતીરમણપ્રિયઃ ॥ ૨૦॥

દક્ષશિક્ષકસન્નૂતો દાન્તરક્ષણસુવ્રતઃ ।
દાસાર્તિશામનાપ્તશ્ચ દાનવાસુરભેદનઃ ॥ ૨૧॥

ગઙ્ગાજનકગમ્ભીરો બદરીધામપાવનઃ ।
પ્રકૃત્યદ્ભુતરૂપશ્ચ દીક્ષાગુરુર્મનઃસ્થલઃ ॥ ૨૨॥

ભાગીરથ્યલકાનન્દાસઙ્ગમસ્થલસાલયઃ ।
રઘુનાથઃ સસીતશ્ચ ગઙ્ગાભિમુખસાલયઃ ॥ ૨૩॥

દેવપ્રયાગદૈવશ્ચ પુણ્યસ્થલસુકીર્તિતઃ ।
પુરાણાલયસંસ્થશ્ચ પુરાણઃ પુરુષોત્તમઃ ॥ ૨૪॥

સાધુમાનસસઞ્ચારઃ સાધુસજ્જનસન્નુતઃ ।
સાકેતપુરિસંજાતઃ સામાદિનિગમાશ્રિતઃ ॥ ૨૫॥

ભુક્તિમુક્તિદલીલશ્ચ મનોગુપ્તસુનામકઃ ।
ભવાબ્ધિતારણોપાયો મન્ત્રતારકગુપ્તસઃ ॥ ૨૬॥

નામતારકસત્સારો રૂપતારકસદ્ગુણઃ ।
નામરૂપાતિશાયી ચ તારણાર્થભવાયનઃ ॥ ૨૭॥

તારકાદ્ભુતચારિત્રસ્તારકાનદનામકઃ ।
તારકારમ્યરૂપશ્ચ તારકાનન્દરામકઃ ॥ ૨૮॥

તારકાનન્દસન્નામધેયસારસુકીર્તિતઃ ।
તારકાધિપવક્ત્રશ્ચ તારાગણસ્ફુરત્સ્મિતઃ ॥ ૨૯॥

ભાનુવંશલલામાજઃ શ્રીમદ્દશરથાત્મજઃ ।
કૌસલ્યાદિવ્યપુત્રશ્ચ સર્વલક્ષણસંયુતઃ ॥ ૩૦॥

સૌમિત્ર્યનુજસુપ્રીતઃ શત્રુઘ્નભરતાગ્રજઃ ।
સર્વલોકસમિષ્ટશ્ચ શશિપૂર્ણશુભાનનઃ ॥ ૩૧॥

અકલઙ્કમુખાલોકઃ અબ્જનેત્રઃસુધાવચઃ ।
અનર્ઘભૂષણોરસ્કઃ અમરાર્ચિતપાદસઃ ॥ ૩૨॥

અરુણોદયસઙ્કાશસ્તરુણારુણસત્પદઃ ।
અર્ણોદશ્યામગાત્રાભઃ કરુણારસપૂરિતઃ ॥ ૩૩॥

મન્દસ્મિતમુખામ્ભોજઃ કુન્દકુડ્મલદન્દશઃ ।
બિમ્બોષ્ઠશ્ચારુવક્ત્રશ્ચ અતિલાવણ્યરામસઃ ॥ ૩૪॥

આજાનુબાહુતેજસ્વી અરવિન્દાક્ષશીકરઃ ।

અગશ્રેષ્ઠાતિગમ્ભીરઃ અજરુદ્રાદિસન્નુતઃ ॥ ૩૫॥

વિધૃતેષુધિકોદણ્ડો વીતતામસરાજસઃ ।
વિધુકોટિશસમ્ભાસો વાગીશનુતરાજસઃ ॥ ૩૬॥

કોદણ્ડપાણિવિખ્યાતઃ કાશીશનુતતારકઃ ।
કુટિલાલકલાવણ્યઃ કવીનહૃદયાલયઃ ॥ ૩૭॥

કપોલમુકુરો માપ્ત ઉમોમાપ્તાપ્તનામકઃ ।
કુમનોગણભીમશ્ચ કુસુમાકરમણ્ડિતઃ ॥ ૩૮॥

દ્યુત્યયુતવિભાકોશો ગમનદ્વિરદાદ્ભુતઃ ।
માધુર્યસ્વરગામ્ભીર્યો જિતાપઘનસુસ્વનઃ ॥ ૩૯॥

ધર્માત્મધન્યધીરશ્ચ ધર્મપાલનસુવ્રતઃ ।
ધર્માર્થકામમોક્ષશ્ચ ધારાધરાભવિગ્રહઃ ॥ ૪૦॥

દિવ્યો દાશરથી દાન્તો દિનનાથાન્વયાબ્ધિચઃ ।
દિવ્યલાવણ્યશૌર્યશ્ચ દીનબન્ધુર્ધરાધિપઃ ॥ ૪૧॥

સાકેતરાજકૌમારઃ સર્વોન્નતગુણાસ્પદઃ ।
સત્યકામઃ સુશીલશ્ચ સત્કારુણ્યસુવૈભવઃ ॥ ૪૨॥

મુનિભાવિતસત્યશ્ચ મુનિમાનસપૂજિતઃ ।
મુનિવન્દિતરામશ્ચ મુનિજીવનજીવનઃ ॥ ૪૩॥

રામઃ કૌશિકમિત્રશ્ચ મુનિયાગસુપાલનઃ ।
તરુણારુણસંદૃશ્યો મુનિપૂજિતસત્પદઃ ॥ ૪૪॥

પાદસ્પર્શજિતાહલ્યાશાપઃ  પાપવિમોચનઃ ।
પાદસ્મરણપાલશ્ચ પાપાન્ધપટભાસ્કરઃ ॥ ૪૫॥

જિતશઙ્કરચાપશ્ચ શ્રીજાનકીમનોહરઃ ।
સીતાહૃદબ્જખદ્યોતઃ સીતારામો રઘૂત્તમઃ ॥ ૪૬॥

ત્રાણશૌર્યસુબાણશ્ચ જામદગ્ન્યમદાપહઃ ।
જિતરામો જિતામ્નશ્ચ સર્વાનન્દકરઃ સુખઃ ॥ ૪૭॥

વીરો જનકજામાતા જાનકીપ્રાણનાયકઃ ।
વરાનન્દસુકન્દશ્ચ મૈથિલીમાનસારમઃ ॥ ૪૮॥

કલ્યાણસુન્દરાકારઃ કલ્યાણરાજમોહનઃ ।
સીતામોહનરામશ્ચ કલ્યાણરૂપસચ્છવિઃ ॥ ૪૯ ॥

માતાપિત્રતિનન્દશ્ચ અયોધ્યાજનમોદનઃ ।
શ્યામમેઘશરચ્ચન્દ્રનિભસીતાસમેતસઃ ॥ ૫૦ ॥

એકવાગેકપત્નીક એકબાણૈકવીર્યવાન્ ।
એકતૃષ્ણાપહૈકશ્ચ એકવસ્તુવપુર્ધરઃ ॥ ૫૧ ॥

આત્મારામો જિતાત્મા ચ જિતકામો જિતેન્દ્રિયઃ ।
માનસારામરામશ્ચ અભિરામઃ સુગારમઃ ॥ ૫૨ ॥

મૃદુભાષઃ સ્વરાનન્દો માધુર્યપૂર્ણસુસ્વરઃ ।
વાચસ્પતિનુતો વાચો વાઙ્માલિકાસુભૂષિતઃ ॥ ૫૩ ॥

નામસુસ્વરમાધુર્યો નામપ્રભાવતારકઃ ।
નામરામસુશબ્દશ્ચ રામો ધર્મપરાક્રમઃ ॥ ૫૪ ॥

ત્યક્તપટ્ટાભિષેકશ્ચ તાતવાક્યસુપાલનઃ ।
સીતાનુગગતારણ્યો લક્ષ્મણાનુજસેવિતઃ ॥ ૫૫ ॥

ગુહારામસ્તપોભાન્તસ્તીર્ણગઙ્ગો ભવાપહઃ ।
તાપસાર્ચિતસત્પાદો ભરાજમુખશોભનઃ ॥ ૫૬ ॥

યોગીન્દ્રભાવિતાત્મા ચ ભરદ્વાજર્ષિસંસ્તુતઃ ।
યમુનાસઙ્ગતાગઙ્ગાપૂતપ્રયાગપાવનઃ ॥ ૫૭ ॥

ચિત્રકૂટગિરિપ્રસ્થો વાલ્મીકિઋષિદર્શિતઃ ।
સૌમિત્રિનિર્મિતારમ્યપર્ણશાલસુવાસિતઃ ॥ ૫૮ ॥

સીતારામો વનારામઃ સૌમિત્રિસેવતોષિતઃ ।
સાધુચિત્પદ્મભાકોશઃ સીતાવરાનુજાશ્રિતઃ ॥ ૫૯ ॥

સ્નાતમન્દાકિનીસીતાસહારામવનાશ્રિતઃ ।
અતિરમ્યવનાનન્દઃ સીતાનુજસમેતસઃ ॥ ૬૦ ॥

ભરતાશ્લિષ્ટમાહાત્મા  પાદુકાપૂતકેકયઃ ।
નન્દિગ્રામાભિષિક્તાદ્વિપાદુકાયોધ્યપાલનઃ ॥ ૬૧ ॥

ઉત્સૃષ્ટચિત્રકૂટશ્ચ અનસૂયાત્રિસઙ્ગતઃ ।
દિવ્યાલઙ્કૃતભાર્યશ્ચ તાપસાશીર્વચાસ્પદઃ ॥ ૬૨ ॥

સમ્પૂતદણ્ડકારણ્યો હતાશરઃ સુહૃદ્ધિતઃ ।
તાપસાર્તિવિનાશશ્ચ મુનિસન્નુતસત્સુખઃ ॥ ૬૩॥

પઞ્ચવટ્યારમારામસ્તપસ્વી યતમાનસઃ ।
પાટિતાસુરવૃન્દશ્ચ વૃન્દારવૃન્દવન્દિતઃ ॥ ૬૪॥

ખરદૂષણસંહારો નિશાચરહરાવ્યયઃ ।
વૈદેહીહર્ષસંશ્લિષ્ટો વૈદેહીભાગ્યભવ્યસઃ ॥ ૬૫॥

ઋષિદેવપરામોદ ઋષિસઙ્કુલસંસ્તુતઃ ।
ઋષભારૂઢવન્દ્યશ્ચ ઋષિવેષમહાયશાઃ ॥ ૬૬॥

તામસાસુરસંહારસ્તાપસાર્તિનિવારણઃ ।
તાપસાનન્દલીલશ્ચ તાપનીયારમારમઃ ॥ ૬૭॥

વારિજાનનનેત્રશ્ચ વરવીરઃ શુભાકરઃ ।
વનમાલી વરાનન્દો વસુધાતનયાપ્રિયઃ ॥ ૬૮॥

માયામારીચસમ્પાટો માયાતીતસ્વરૂપવાન્ ।
માયાદારી મહાબાહુર્માયામ્બુદસમીરણઃ ॥ ૬૯॥

લુપ્તસીતામહાપ્રેક્ષઃ ક્ષિતિજાન્વેષણાયુતઃ ।
પરિત્યક્તજનસ્થાનસ્ત્યક્તપઞ્ચવટીતટઃ ॥ ૭૦॥

આસાદિતજટાયુશ્ચ આત્મબન્ધુઃ સુભાષિતઃ ।
ભૂજાહરણસન્દેશક્રોધિતાસાધ્યવીરસઃ ॥ ૭૧॥

જટાયુમોક્ષસંસ્કારો રાજાધિપો વનેચરઃ ।
જનાધારો જરાપેતો રાજીવલોચનાપરઃ ॥ ૭૨॥

શબર્યુપહૃતાશશ્ચ શબરીભક્ત્યુપાશ્રયઃ ।
શબરીમોક્ષસાક્ષી ચ સર્વસાક્ષી દિનાન્વયઃ ॥ ૭૩॥

પમ્પાતીરસુસઞ્ચારઃ પમ્પાપારસુસઞ્ચરઃ ।
ઋષ્યમૂકપ્રતિપ્રસ્થો રાજર્ષિવેષતેજસઃ ॥ ૭૪॥

હનુમત્સઙ્ગતશ્શસ્તઃ સભ્રાતૃકશ્ચ માવરઃ ।
સીતાન્વેષણયુક્તશ્ચ હનુમચ્છ્લોકિતાનુતઃ ॥ ૭૫॥

સુગ્રીવોપેતસુગ્રીવઃ સૌમિત્રિસેવિતાગ્રથઃ ।

મિત્રીકૃતેનપુત્રશ્ચ મિત્રવંશપ્રદીપકઃ ॥ ૭૬॥

દૃષ્ટજાનક્યલઙ્કારઃ કીશપ્રાઞ્જલિસેવિતઃ ।
સાલસમ્પાટનાક્લિષ્ટઃ સુગ્રીવપ્રત્યયાવહઃ ॥ ૭૭॥

પાલિતાદત્તવાક્યશ્ચ પ્રાપ્તરાજ્યસુહૃત્કપિઃ ।
માલ્યવદ્ વૃષ્ટિવાસશ્ચ ત્યક્તકામો મદાપહઃ ॥ ૭૮॥

દત્તાઙ્ગુલીયપૌરસ્યપ્રભાવનામતારકઃ ।
દનુજાહવનિશ્શઙ્કો હનુમદ્ધેનતારણઃ ॥ ૭૯॥

હનુમન્નીતસન્દેશસીતાદર્શનનન્દિતઃ ।
હર્યાનીતવધૂભૂષચૂડામણ્યતિહર્ષિતઃ ॥ ૮૦॥

પરિષ્વક્તમરુજ્જાતો માધુર્યપૂર્ણભાષણઃ ।
પરિચારવનૌકશ્ચ મારુત્યારૂઢવીર્યવાન્ ॥ ૮૧॥

સમુદ્રતીરસમ્પ્રાપ્તો વિભીષણકૃતાઞ્જલિઃ ।
સર્વલોકશરણ્યશ્ચ વિભીષણાભયપ્રદઃ ॥ ૮૨॥

સત્યવાક્સત્યકર્મા ચ અભિષિક્તવિભીષણઃ ।
શત્રુમિત્રસમાલોકઃશરણાગતપાવ્રતઃ ॥ ૮૩॥

સાગરોપાસશૂરશ્ચ અબ્ધિવેલકુશાસ્તરઃ ।
આશુગાશનશાયી ચ અબ્ધિતીરોપશાયનઃ ॥ ૮૪॥

ક્રુધ્યક્રોધો જિતક્રોધઃ પાથોધિમદહારકઃ ।
આપગેશાર્ચિતાનૂત આપ્તકામાપ્તપાલનઃ ॥ ૮૫॥

સેતુબન્ધનશાન્તશ્ચ શુદ્ધાન્તરઙ્ગસેવિતઃ ।
સેવ્યઃ સેવકસંરક્ષો હનુમદ્વાહનોત્તમઃ ॥ ૮૬॥

રણધીરઃશરાસારો રામો ભીમપરાક્રમઃ ।
રાક્ષસાભીષણાનન્યો રિપુસૂદનસચ્છરઃ ॥ ૮૭॥

ભાસ્કરાંશુશરાવર્ષી ભાસ્કરાયુતતેજસઃ ।
ભાસ્કરાન્વયશૂરશ્ચ નુતભાસ્કરભાસુરઃ ॥ ૮૮॥

કુમ્ભજાગસ્ત્યગેયશ્ચ મુનિસજ્જનસન્નુતઃ ।
કોદણ્ડપાણિપુણ્યશ્ચ શરનૈપુણ્યસાગરઃ ॥ ૮૯॥

રાક્ષસવ્યૂહનાશશ્ચ હતરાવણરાક્ષસઃ ।
રિપુભીષણબાણશ્ચ જિતાધર્મસુધર્મપા ॥ ૯૦॥

ધર્મસંસ્થાપનાનન્તો દત્તરાજ્યવિભીષણઃ ।
દેવદેવાર્ચિતાનૂતઃ પુષ્પાવર્ષાભિષિક્તવાન્ ॥ ૯૧॥

નીતસીતાસુપૂતશ્ચ અગ્નિપ્રજ્જ્વલશૌચતઃ ।
શ્રીમન્નારાયણાનન્તો લક્ષ્મીસહાવતીર્ણવાન્ ॥ ૯૨॥

બ્રહ્માણ્ડનાયકો રામો બ્રહ્માશઙ્કરસંસ્તુતઃ ।
પિતૃસ્વસ્ત્યયનાશ્યુક્તઃ પિતૃસંશ્લિષ્ટસત્સુતઃ ॥ ૯૩॥

વિમાનપુષ્પકારૂઢઃ સીતારામપરન્તપઃ ।
સભ્રાતૃલક્ષ્મણાપૂજ્યઃ સુગ્રીવહનુમચ્છ્રિતઃ ॥ ૯૪॥

જામ્બવદ્વાનરાનીકો નાકમાર્ગપ્રયાણકઃ ।
જ્ઞાતાજ્ઞાતસ્થલાદર્શસીતેચ્છાપરિપૂરકઃ ॥ ૯૫॥

ભરદ્વાજાશ્રમાગન્તુર્મુનિપૂજનસન્નુતઃ ।
ભરતાહર્ષસંશ્લિષ્ટઃ કૌસલ્યાનન્દવર્ધનઃ ॥ ૯૬॥

સાકેતસાગરાબ્જશ્ચ કોલાહલજનાઞ્જલિઃ ।
સુસ્વાગતજનારામો ભરતાયુક્તપાદુકઃ ॥ ૯૭॥

નન્દિગ્રામપ્રવેશશ્ચ સુપૂતભરતાશ્રમઃ ।
ગુરુવન્દનસંયુક્તઃ પુનર્દત્તકુભેરયઃ ॥ ૯૮॥

વિશોધિતજટાજૂટઃ સ્નાનાનુલેપનોજ્જ્વલઃ ।
કૌશેયવાસભાસશ્ચ કૌશલ્યાપ્રિયપુત્રસઃ ॥ ૯૯॥

સર્વાલઙ્કારભાર્યશ્ચ અયોધ્યાનગરીપ્રયઃ ।
સાકેતધામસૂર્યશ્ચ અયોધ્યાનગરીપ્રિયઃ ॥ ૧૦૦॥

સાકેતરાજરાજન્યઃ પટ્ટાભિષેકવૈભવઃ ।
અતિકોલાહલાનન્દસર્વોન્નતસુવૈભવઃ ॥ ૧૦૧॥

સુસિંહાસનરત્નાભઃ સસીતઃ સુરસેવિતઃ ।
વસિષ્ઠવામદેવાદ્યભિષિક્તો વરરામસઃ ॥ ૧૦૨॥

સર્વોદધિજલાસિક્તઃ સર્વનદ્યભિષેચિતઃ ।
સર્વૌષધિરસાસિક્તો દિવ્યાભિષેકરાજિતઃ ॥ ૧૦૩॥

સર્વોપનિષદાસક્તઃ સર્વવેદાર્થસારસઃ ।
સર્વાધારઃ પરાર્થશ્ચ સર્વશાસ્ત્રપદાર્થસઃ ॥ ૧૦૪॥

સર્વમઙ્ગલસંયુક્તઃ સર્વજીવનજીવનઃ ।
સર્વભવ્યગુણશ્રાયઃ સર્વનેત્રોત્સવચ્છવિઃ ॥ ૧૦૫॥

સુમુત્યરત્નહારશ્ચ શતાબ્જહેમમાલિનઃ ।
ઇન્દ્રનીલપ્રકાશશ્ચ ઇક્ષ્વાકુવંશભાસ્કરઃ ॥ ૧૦૬॥

શત્રુઘ્નસંધૃતચ્છત્રઃ સૌમિત્રિભરતાઞ્જલિઃ ।
વાલવ્યજનસુગ્રીવો વિભીષણાન્યચામરઃ ॥ ૧૦૭॥

ગાનનર્તનનન્દશ્ચ સઙ્ગીતપ્રિયસુસ્વરઃ ।
કાકુત્સ્થરાજસિંહશ્ચ કાકર્લવંશજસ્તુતઃ ॥ ૧૦૮॥

ભર્મચેલવિરાજશ્ચ લસન્મકુટકુણ્ડલઃ ।
ભાતુવંશાધિરાજશ્ચ લોકાભિરામસુવ્રતઃ ॥ ૧૦૯॥

લાવણ્યરામભદ્રશ્ચ લક્ષ્મીરમણભૂપતિઃ ।
લોકાવનાભિયુક્તશ્ચ લોકત્રાણાભિપૂજિતઃ ॥ ૧૧૦॥

તમાલઘનનીલાભો ઘનાઘનઘનસ્વરઃ ।
ઘૃણાપાઙ્ગો ઘનાભશ્ચ ઘનાઘઘનમારુતઃ ॥ ૧૧૧॥

પટ્ટાભિરામચન્દ્રશ્ચ પરમાનન્દવારિધિઃ ।
પરમાદ્ભુતચારિત્રઃ પઙ્કજાક્ષીસમેતસઃ ॥ ૧૧૨॥

કપિશ્રેષ્ઠનુતશ્રીમાન્ કામિતાર્થપ્રદાયકઃ ।
કાયજારિનુતશ્રેષ્ઠઃ કામાદિરિપુદારકઃ ॥ ૧૧૩॥

શતિરાગનુતાગીતઃ શતકોટિરવિપ્રભઃ ।
શતિશ્લોકસુવાગર્થઃ શતકોટિનમસ્કૃતઃ ॥ ૧૧૪॥

શ્રીત્યાગબ્રહ્મસંદર્શપટ્ટાભિરામપૂજ્યસઃ ।
શ્રીમત્સિંહાસનાભૂષઃ શ્રીજાનકીસુભાગ્યસઃ ॥ ૧૧૫॥

શ્રીત્યાગબ્રહ્મવાગ્વર્ષસ્નિગ્ધપટ્ટાભિરામસઃ ।
સદ્ગુરુસ્વામિસઙ્ગીતજગન્મોહનરામસઃ ॥ ૧૧૬॥

ત્યાગબ્રહ્મનુતાગીતપુણ્યચારિત્રમાહિનઃ ।

શ્રીસીતારામદૈવશ્ચ સર્વમઙ્ગલદાયકઃ ॥ ૧૧૭॥

શ્રીત્યાગબ્રહ્મહૃદ્વાસસ્તત્પ્રત્યક્ષસુધાવચઃ ।
ગુરુસ્વામિસુસઙ્ગીતપૂર્ણવાસસનાતનઃ ॥ ૧૧૮॥

શ્રીત્યાગબ્રહ્મસન્નૂતિદિવ્યનામસુકીર્તનઃ ।
ગુરુનિત્યોત્સવાગીતો ગુરુસાક્ષાત્કૃતેશ્વરઃ ॥ ૧૧૯॥

ગુરુસઙ્ગીતસાન્નિધ્યો નાદસુધારસાકૃતિઃ ।
સપ્તસ્વરનદદ્ઘણ્ટઃ કોદણ્ડરામસુસ્વરઃ ॥ ૧૨૦॥

જયાઘોષનયદેશ્યશ્ચ રસસઙ્ગતિવાગ્ગતિઃ ।
ગતિતાલશરાવર્તો ભજનાનન્દસેવિતઃ ॥ ૧૨૧॥

ગુરુકીર્તનસત્સારો રાગરત્નસુમાલિકઃ ।
ગુરુદેવપરાનિષ્ઠો ગુરુદેવાપરઃ પરઃ ॥ ૧૨૨॥

ઓંકારધામસન્નામ  ઓંકારનાદવિગ્રહઃ ।
ઓંકારપઞ્જરાગુપ્ત ઓંકારસ્વરપૂજિતઃ ॥ ૧૨૩॥

શ્લોકિતસ્વચરિત્રશ્ચ પુષ્પાવલિસુમણ્ડિતઃ ।
નાન્યોપયુક્તચેતઃપુષ્પાસક્તિસ્તુતિસેવિતઃ ॥ ૧૨૪॥

રામાયણકથાસારં શ્રીરામસુકૃપાવહમ્ ।
રામસ્તોત્રં મહાપુણ્યં ગુરુપ્રેર્યં શુભપ્રદમ્ ॥ ૧૨૫॥

મઙ્ગલં રામચન્દ્રાય સીતાશ્રીમણિજાનયે ।
ત્યાગબ્રહ્મસુલીનાય મઙ્ગલાઙ્ગાય મઙ્ગલમ્ ॥ ૧૨૬॥

મઙ્ગલં ગુરુદેવાય એતત્સ્તોત્રપ્રભાવિને ।
રામભદ્રસુલીનાય ત્યાગરાજાય મઙ્ગલમ્ ॥ ૧૨૭॥

ઇતિ સદ્ગુરુશ્રીત્યાગરાજસ્વામિનઃ શિષ્યયા ભક્તયા પુષ્પયા
અનુરાગેણ કૃતં શ્રીમદ્રામાયણસારશ્રીરામસ્તોત્રં ગુરૌ સમર્પિતમ્ ।

ॐ

શુભમસ્તુ ।

Source Shri Tyagarama Pushpavali 2005
Encoded and proofread by N V Vathsan nvvathsan at gmail.com
Copyright Pushpa Srivatsan

*shrImadrAmAyaNasArashrIrAmastotram*

This text is entirely original composition of Smt. Pushpa Srivatsan, and copyright Smt. Pushpa Srivatsan. All rights reserved by the author. 1) **Under no conditions** can either the whole or any part of this composition be **translated**, **adapted**, or **used for commercial purposes**. 2) Neither the whole nor any part of this composition can be reproduced, recorded, used in public perfomances, or distributed in any other way without **prior written permission** from the copyright holder, the author Smt. Pushpa Srivatsan (contact N V Vathsan nvvathsan@gmail.com).

pdf was typeset on April 30, 2023

Please send corrections to *sanskrit@cheerful.com*